संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - १७
प्रधानसम्पादकः - राधावल्लभत्रिपाठी

माधवदेवकृता

# तर्कभाषाव्याख्या सारमञ्जरी

सम्पादकः
टी०डी० मुरलीधरः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# आमुखम्

संस्कृतवाङ्मयमहोदधेः बहूनि ग्रन्थरत्नानि प्रकाशनाभावात् नाद्यावधि लोकलोचनगोचरीभूतानि अभवन्। हस्तलेखालयेषु/पाण्डुलिपिग्रन्थसङ्ग्रहालयेषु, प्राचीनगृहेषु वा विद्यमानान् तादृशग्रन्थान् प्रकाशयितुं बहुभिर्विद्वद्भिः विविधाभिः संस्थाभिश्च बहुविधप्रयासाः कृताः क्रियमाणाश्च वर्तन्ते। तादृशप्रयासेषु राष्ट्रियसंस्कृतसंस्थानस्य संस्कृतवर्षस्मृतिग्रन्थमालान्तर्गता अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनयोजना अन्यतमा।

बहुभिः स्वीयशोधोपाधिनिमित्तं सज्जीकृताः हस्तलिखित-ग्रन्थविशेष-सम्पादनात्मक-शोधप्रबन्धाः तत्तद्विश्वविद्यालयेषु समर्पिताः। किन्तु तादृशेषु शोधप्रबन्धेषु बहवः हस्तलिखिता (न टङ्किताः) अप्रकाशिता एव सन्ति। राष्ट्रियसंस्कृतसंस्थाने २००३ पर्यन्तम् अनुसन्धातृभिः आहत्य १६९ हस्तलिखित-ग्रन्थविशेष-सम्पादनात्मक-शोधप्रबन्धाः (Critical editions of Manuscripts) विद्यावारिध्युपाधये समर्पिता आसन्। तेषु अङ्गुलिगणनीया एव सम्पादकानां वैयक्तिकप्रयासेन प्रकाशं गताः।

एतदतिरिच्य काश्चन प्राचीनकृतयः कैश्चिद्विद्वद्भिः सम्पादिताः (शोधप्रबन्धेतराः) अपि तेषां वैयक्तिकसौकर्याभावात् प्रवृत्त्यभावाद् वा अप्रकाशिताः सन्ति। एवम् उभयविधेषु (सम्पादनात्मकशोधप्रबन्धेषु, तदितर-सम्पादितग्रन्थेषु च) अत्युत्तमान्/योग्यान् चित्वा ते संस्कृतवर्षस्मृतिग्रन्थमालान्तर्गतायाम् (युगाब्दः ५१०१ तम-वर्षं संस्कृतवर्षत्वेन भारतशासनेन उद्घोषितमासीत्। तदाचरणस्मृतिं स्थिरयितुं कल्पितायां) अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनयोजनायां प्रकाशनीयाः इति कश्चन निर्णयः पूर्वं स्वीकृत आसीत्। तदनु अस्यां धारायाम् अद्य यावत् १६ ग्रन्थाः प्रकाशमुपनीताः। सम्प्रति सप्तदशं ग्रन्थपुष्पमेतद् विकसद्विलोक्य हर्षप्रकर्षमनुभवामि।

प्रकृतं प्रकाश्यमानोऽयं ग्रन्थः केशवमिश्रविरचितायाः तर्कभाषायाः व्याख्यारूपः। अन्नम्भट्टविरचिततर्कसङ्ग्रहात् प्राक् प्रचुरप्रचारं गता तर्कभाषा न्यायशास्त्राध्येतृभिः आदृतः विशिष्टो ग्रन्थः। तस्य विंशत्यधिकव्याख्याः विभिन्नैर्विद्वद्भिः व्यरच्यन्त इति श्रूयते। (एतेनास्य ग्रन्थस्य महत्त्वं स्फुटं ज्ञायते।) तादृशव्याख्यासु अन्यतमां सारमञ्जरीनाम्नीं टी० डी० मुरलीधरः आचार्यस्य एन्०एस्० रामानुजताताचार्यमहोदयस्य मार्गदर्शने सम्पाद्य शोधोपाधिं प्राप्नोत्। षोडशशताब्दीयेन माधवदेवेन रचितेयं सारमञ्जरी अद्य यावदप्रकाशिता

ननु - अनुभवत्वजातौ मानाभावः। न चानुभवामीति प्रतीत्या तत्सिद्धिः। शाब्दबोधोत्तरम् इदमनुभवामीतिप्रतीत्यभावेन प्रत्यक्षस्य लौकिकविषयताया वा तादृशप्रतीतिविषयत्वात्। न च विशेषणज्ञानजन्यतावच्छेदकतया [1]अनुभवत्वजातिसिद्धिः। घटज्ञानोपरमेऽपि घटकृतेः विशिष्टसाक्षात्कारेण विशिष्टानुभवं प्रति विशेषणज्ञानस्याहेतुत्वात्। न च कृतिसाक्षात्कारात् पूर्वं विशेषणस्मृतेः [2]घटसन्निकर्षार्थकल्पनात् नोक्तदोष इति वाच्यम् विशिष्टस्मृतेः पूर्वमपि निर्विकल्पकरूपविशेषणस्मृतिकल्पनेन विशिष्टज्ञानत्वावच्छिन्नं प्रति विशेषणज्ञानस्य हेतुत्वसंभवात् अनुभवत्वजातिकल्पने गौरवादित्याह - अनुभवेति।

न चानन्तविशिष्टस्मृतेः पूर्वमनन्तविशेषणस्मृतिकल्पनाऽपेक्षया अनुभवत्वजातिकल्पनैव लघीयसीति वाच्यम्। विशिष्टप्रत्यक्षं प्रत्येव विशेषणज्ञानस्य हेतुत्वकल्पनात्। अनुमित्यादौ विशिष्टपरामर्शादेः विशिष्य कारणत्वेनैवातिप्रसङ्ग-वारणात्। न चाप्रसिद्धसाध्यकानुमितेः साध्यप्रकारकत्वापत्तिरिति वाच्यम्। क्षणविलम्बस्य शपथनिर्णेयत्वेनेष्टत्वात्। अत एव विशेषणतावच्छेदकप्रकारकविशेषणनिर्णय-जन्यतावच्छेदकतयापि नानुभवत्वजातिसिद्धिः। तस्यापि विशिष्टवैशिष्ट्य-प्रत्यक्षहेतुत्वस्य व्यवस्थापितत्वात्।

न च प्रत्येकं रक्तदण्डपुरुषाणां पदजन्यपदार्थोपस्थितौ विशिष्टवैशिष्ट्यबो-धापत्तिः इति वाच्यम्। विशिष्टवैशिष्ट्यशाब्दबोधे विशेषणतावच्छेदकप्रकारक विशेषणोपस्थितेः पदप्रयोज्याया हेतुत्वात्। अन्यथा प्रत्यक्षेण विशेषणतावच्छेदक-प्रकारकविशेषणोपस्थितावपि विशकलित[3] पदजन्यपदार्थोपस्थित्या अवान्तरवाक्यार्थ - बोधं विनापि विशिष्ट वैशिष्ट्यबोधापत्तेरिति[4] दिक्।

ननु - करणत्वं किमत आह - साधकतममिति। प्रकृष्टमिति। व्यापारवत्-कारणमित्यर्थः।

**गौरीकान्तस्तु** - व्यापारवदसाधारणं कारणं करणमिति। तथा चायमर्थः - व्यापारवत्वे सति जात्यवच्छिन्नप्रमानिष्ठकार्यताप्रतियोगिककारणताशालि प्रमाणम्।

---

1. अनुभवं प्रतिअनुभवत्वजातिसिद्धेः (द्धि) A-I.O.
2. घटसंनिकर्ष... अनुभवेति इत्यन्तोभाग A. मातृकायां त्रुटितः।
3. विशकलितपदार्थो- Ad.
4. बोधापत्तिरितिदिक् Ad.

## ॥ अप्रकाशितपाण्डुलिपिग्रन्थमालायां प्रकाशिताः ग्रन्थाः ॥

| कुसुमसंख्या | ग्रन्थनाम | सम्पादकः | मूल्यम्* |
|---|---|---|---|
| 1. | ठक्कुरसंग्रामसिंहविरचिता **बालशिक्षा** | भवानीशङ्करशर्मा | 190/- |
| 2. | सुकुमारकविप्रणीतं **श्रीकृष्णविलासमहाकाव्यम्** **(बालपाठ्यव्याख्योपेतम्)** | ई. एम्.राजन् | 220/- |
| 3. | नारायणसुधीकृतः **भाट्टनयोद्योतः** | सूर्यनारायणनागेन्द्रभट्टः | 425/- |
| 4. | अन्नम्भट्टप्रणीतं **सिद्धाञ्जनम्** **(तत्त्वचिन्तामण्यालोकव्याख्योपेतम्)** | एम्. विश्वनाथशास्त्री | 240/- |
| 5. | वासुदेवत्रिपाठिप्रणीतः **प्रायश्चित्तविलोचनः** | सन्तोषकुमारपण्डा | 250/- |
| 6. | आनन्दानुभवकृतः **पदार्थतत्त्वनिर्णयः** | शुद्धानन्दपाठकः | 190/- |
| 7. | वासुदेवकविकृतं **युधिष्ठिरविजयम्** **(बालव्युत्पत्तिकारिणी-टीकोपेतम्)** | वाई. एस्. रमेशः | 600/- |
| 8. | वराहमिहिरकृता **बृहत्संहिता (उत्पलपरिमलव्याख्योपेता)** | के.वी. शर्मा | 675/- |
| 9. | **याज्ञिक्युपनिषत् (विज्ञानेश्वरप्रणीतविवरणसहिता)** | सूर्यनारायणनागेन्द्रभट्टः | 280/- |
| 10. | किलिमङ्गलं नारायणनम्पूतिरिप्रणीता **प्रक्रियासर्वस्वविवृतिः** | एम्. के. आण्ड्रयूस् | 165/- |
| 11. | मधुसूदन-ओझा-कृतः **व्याकरणविनोदः** | महेन्द्रकुमारशर्मा | 330/- |
| 12. | भूमभट्टप्रणीतम् **अर्जुनरावणीयम् (कैरलीटीकोपेतम्)** | विजयपालशास्त्री | 340/- |
| 13. | श्रीरामचन्द्रभट्टप्रणीतं **सभ्याभरणम्** **(मयूखमाला-व्याख्योपेतम्)** | राजेन्द्रप्रसादभट्टः | 300/- |
| 14. | उमामहेश्वरविरचिता **तत्त्वचन्द्रिका** | एम्. चन्द्रशेखरः | 340/- |
| 15. | जम्बुनाथविरचितः **प्रश्नसारसमुद्रः** | एम्. अनन्तपद्मनाभभट्टः | 260/- |
| 16. | उदयङ्करविरचिता **परिभाषाप्रदीपार्चिः** | मुरारीलालशर्मा | 150/- |
| 17. | माधवदेवकृता **तर्कभाषाव्याख्या सारमञ्जरी** | टी.डी. मुरलीधरः | 155/- |
| 18. | चन्द्रदत्तविरचितं **भगवद्भक्तिमाहात्म्यम्** | बाबूरामशर्मा | 440/- |
| 19. | अज्ञातकर्तृकः **पार्वतीस्वयंवरः** | पी.के. माधवन् | |

**★ संस्थाननियमानुसारं मुद्रितमूल्यस्य 40% अपकर्षः प्रदीयते।**

*प्रतिकृतीनां कृते-*

**Rashtriya Sanskrit Sansthan (Deemed University)**
56-57 Institutional Area, Janakpuri, New Delhi-110058
EPABX: 011-28524993 / 28521994 / 28524995, Extn.214-215
**E-mail: rskssale@yahoo.co.in , rsks@nda.vsnl.net.in**
**www.sanskrit.nic.in**